National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2020 ( 1(33): 182-183
© 2020 NJHSR
www.sanskritarticle.com

**अञ्जली कबाट**
शोधछात्रा, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**अञ्जली कबाट**
शोधछात्रा, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# महाकाव्येषु किरातार्जुनीयस्य स्थानम्

**अञ्जली कबाट**

**DOI:** https://doi.org/10.5281/zenodo.19789721

गीर्वाणवाण्यां बहूनि महाकाव्यानि विविधकविवरेण्यैः कृतानि वर्तन्ते। परन्तु प्रधानतया तेषु महाकाव्येषु पञ्च एव प्राधान्यं प्रापुः। किरातार्जुनीयं हि सर्वविधलक्षणेपेतं महाकाव्यम्। वृहत्रय्यां किरातार्जुनीयस्यैव नाम प्रथमं दृश्यते। महाभारतस्य वनपर्वाणि समुल्लिखितमर्जुनस्य पाशुपतास्त्रप्राप्तिवृत्तान्तमादाय निवद्धमिदं महाकाव्यं भावपक्षापेक्षया कलापक्षमेव समधिकं पुष्णाति।

किरातश्च अर्जुनश्च किरातार्जुनीयौ तावधिकृत्य कृतं काव्यं किरातार्जुनीयम्। द्यूते पराजितो युधिष्ठिरः सानुजः सभार्यः संविदनुसारेण वनवासनिमित्तं द्वैतवनं प्रविशति। तत्रस्थः सः स्थितिं ज्ञातुं सधर्मराजः कश्चित्किरातं वर्णिरूपेण हस्तिनापुरं प्रेषयति। ज्ञातवृत्तस्स द्वैतवनमागत्य युधिष्ठिराय निवेदयति। युधिष्ठिरोऽपि तत्सर्वं भातृभ्यः श्रावयति। तदानीं विपक्षस्यौत्कर्षमसहमाना द्रौपदी पतिं धिक्कृतवती, सती युद्धाय च प्रेरयति। प्रियोक्तं द्रढयन्भीमोऽपि तं धैर्यमपहाय विक्रमाय प्रेरयति। युधिष्ठिरश्च तं सान्त्वयन्नेव भवति। तदा प्रकटेन व्यासेन निर्दिश्यते अर्जुनः दिव्यास्त्रलाभाय प्रेष्यतामिति। अनन्तरम् अर्जुनः यक्षेण सह तपस्तुं हिमालयं प्रविशति। इन्द्रकीलपर्वतं गत्वा तपसि मग्नोऽर्जुनः विघ्नैः प्रति हन्यमानोऽपि स्वलक्ष्यान्नैव चलति। तं परीक्षितुं शिवः किरातवेषेण तत्रागच्छति। उभावपि समकालं मायाविनं सूकरं प्रहरतः। तस्य निधनकारणमादाय तयोर्विवादः समुत्तिष्ठते। युद्धे पराजितोऽप्यर्जुनः स्वप्रयासं नैव जहाति।तेन परमं प्रीतः शङ्करः तस्मै पाशुपतास्त्रं ददाति। पञ्चदशसर्गे भारवेः शब्दविलासो दर्शनीयः तत्र कतिपये श्लोका एकाक्षरिणः, द्रव्यक्षरिणश्च सन्ति।

उदाहरणम् –

**चारचोञ्चुभिराचेचीचञ्चञ्चीररुरवारुचः।**
**चचाररुचिररवारुचारेराचारचञ्चुरः।।**

एवमेव अस्मिन्काव्ये राजनीतिप्रावीण्यम् अपि सम्यक्तया उक्तम्। यथा–

**"व्रजन्ति ते मूढधियःपराभवं भवन्ति मायाविषु येन मायिनः।**
**व्रजन्ति शत्रूनवधूय निःस्पृहाःशमेन सिद्धिं मुनयो न भूभृतः।।**

अस्मिन् काव्ये छन्दः प्रयोगेऽप्यस्य महत्कौशलं दृश्यते। एवमेव सुक्तिमुक्तानां वाक्यानि अपि दृश्यते। यथा "हितं मनोहारि च दुर्लभं वचः", "न वञ्चनीयाः प्रभवोऽनुजीविभिः",

"प्रकर्षतन्त्रा हि रणे जयश्रीः", "अविवेकः परमापदां पदम्" इत्यादि।

**उत्फुल्लस्थलनलिनीवनादमुष्मादुद्धूतःसरसिजसम्भवःपरागः।**
**वात्याभिर्वियति विवर्तितःसमन्तादाधत्तेकनकमयातपत्रलक्ष्मीम्।।**

अस्मिन् पद्ये कविः आतपत्रभावनां सुन्दरतया वर्णयति। अतः एव भारवेः "आतपत्रभारविः" छत्रभारविः इति यशः प्राप्तम्।

काव्येऽस्मिन्वनेचरमुखाद्दुर्योधनशासनवृत्तान्तवर्णनम्, द्रौपदीवर्णनम्, राजनीतिकुशलता, शरद्वर्णनम्, हिमालयवर्णनम्, गन्धर्वाप्सरसां विलासवर्णनम्, उद्यानजलक्रीडा, सायंचन्द्रोदयसुरत-प्रभातादिवर्णनम्, शिवार्जुनयोः युद्धवर्णनं च अत्र प्रस्तावितानि। एतैः वर्णनैः विलसितं काव्यम् इति कारणेन महाकाव्येषु किरातार्जुनीयस्य स्थानम् अग्रगण्यं विद्यते।

**भारवेःपरिचयः-**

संस्कृतसाहित्ये प्रौढकविषु अन्यतमः भारविः किरातार्जुनीयं नाम महाकाव्यं व्यरचयत्। अलङ्कारशैल्याः ओजोगुणभूयिष्ठशैल्याः च अग्रगण्यः इति वक्तुं शक्यते। काव्यप्रणयने काव्ये नूतनपद्धतिम् अवलम्बितवान् इति वक्तुं शक्यते। अर्थगौरववतां पदानां प्रयोगस्त्वस्य वैशिष्ट्यम्।

**❖ कविकालः -**

अस्य कालविषये मतभेदाः वर्तन्ते। परन्तु अयं महाकविः "षष्टशताव्दस्य", क्री.श. 634 पूर्वमेवायमासीत्। कविः माघः काव्यरचनायां भारविम् अनुसृतवान् इति विमर्शकाः चिन्तयन्ति। अतः भारविः माघस्य पूर्ववर्ती इति वक्तुं शक्यते। क्री.श.634 द्वितीयपुलकेशिनः "ऐहोले" शासने कालिदासेन सह भारवेः प्रशस्तिरपि वर्तते। अतः अयं क्री.श.634 वर्षात्पूर्वतनः इति वक्तुं शक्यते। एवं प्रकारेण भारविः 553-634 मध्ये न्यवसत् इति वक्तुं शक्यते।

**❖ भारवेः कवित्त्वम् -**

**नारिकेलफलसन्निभं वचो भारवेः सपदि तद्विभज्यते।**
**स्वादयान्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम्।।**

इत्यनेन पद्येन मल्लिनाथः भारवेः कवित्वस्य प्रशंसाम् अकरोत्। अयं भारविः अलङ्कारप्रयोग एव न, अपि तु एकाक्षरगोमूत्रादिकादिबन्धान्प्रयुक्तवान्। काव्येऽयं बहूनि छन्दांसि प्रयुक्तवान् परन्तु अस्य प्रियं छन्दः "वंशस्थम्", इति वक्तुं शक्यते। अस्य कवित्वे बह्व्य लोकोक्तयः नीतिवाक्यानि च वर्तते।

अयं राजनीतिज्ञः, वीररसः अस्य प्रियः रसः। अत एव काव्ये प्रधानरसः 'वीरः' एव। भारविः

उपमा, उत्प्रेक्षा, अर्थान्तरन्यासः, श्लेषः इतीमान् अलङ्कारान् प्रयुक्तवान्।

**किरातार्जुनीयस्य व्याख्यानानि –**

किरातार्जुनीयस्य मल्लिनाथव्याख्यानसहितानि 36 व्याख्यानानिसन्ति। अन्यानि 33 व्याख्यानानि एतावदपि अमुद्रितानि एव। तत्र व्याख्याकारा यथा (1)विद्यमाधवः (2)मङ्गलः (3)देवराजभट्टः (4)रामचन्द्रः (5)क्षितिपालमल्लः (6)कृष्णकविः (7)एकनाथः (8)हरिकान्तः (9)भरतसेनः (10)भागीरथमिश्रः (11)पेदभट्टः (12)अल्लान्दनरहरिः (13)हरिदासः (14)काशीनाः (15)दुमविजयज्ञानि (16)राजकुण्ड (17)गदसिंहः (18)दामोदरमिश्रः (19)मनोहरशर्मन् (20)माधवः (21)लोकानन्दः (22)वङ्किदासः (23)विजयरामः (24)शव्दार्थदीपिकाव्याख्याकारः (25)सरस्वतीतीर्थः (26)प्रसन्न-साहित्यचन्द्रिकाव्याख्याकारः (27)नृसिंहः (28)रविकीर्तिः (29)श्रीरङ्गदेवः (30)श्रीकान्तः (31)वल्लभदेवः (32)विद्यासारः (33)गङ्गाधरमिश्रः।

एततृकर्तृव्याख्यानानि एव अस्य काव्यस्य प्राशस्त्यं स्पष्टयन्ति।

किरातार्जुनीयम् इति एकेनैव काव्येन महाकविः भारविः संस्कृतकाव्यजगतः आकाशे उज्ज्वलनक्षत्ररूपेण विराजते।

महाकवेः भारवेः रचना वैशिष्टेषु एकम् अन्यतमं विलक्षणं च वैशिष्ट्यम् अस्ति 'अर्थगौरवम्'। अस्मिन् प्रसङ्गे प्रसिद्धः एकः श्लोकः वर्तते-

**"उपमा कालिदासस्य भारवेरर्थ गौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयोगुणाः।।"**

**ग्रन्थसूची-**


1.किरातार्जुनीयम्, वद्रीनारायण मिश्रः, चौखम्बा सुरभारती प्रकाशन्, वाराणसी।

2.किरातार्जुनीयम् (महाकवि भारविः)- आचार्य शेषराज शर्मा, चौखम्बा सुरभारती प्रकाशन्, वाराणसी।

3.किरातार्जुनीयम्, पं.परमेश्वरदीन पाण्डेयः, चौखम्बा कृष्णदास अकादमी, वाराणसी।

4.महाकवि भारवि प्रणीत किरातार्जुनीयम्, कानाइ लाल राय, समय प्रकाशन, बांलादेश, (प्रथम प्रकाशन-2017)।

5.विकिपिडिया…